Postal Regd.No. GAMC- 1553/2022-2024 ISSN 2454-6313

संस्कृत - साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २१६
अप्रैल - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

✍ सतीशः गज्जर्

### रावणः, कुम्भकर्णः, विभीषणः

रावणः असञ्ज्ञः आसीत्। कुम्भकर्णः विसञ्ज्ञः आसीत्। विभीषणः ससञ्ज्ञः आसीत्। रामस्य प्रीतिः अवश्यं लभ्यते। परन्तु तदर्थं ससञ्ज्ञता आवश्यकी। अस्माकं जीवने एते – असञ्ज्ञः, विसञ्ज्ञः, ससञ्ज्ञः च – त्रयः शब्दाः भिन्नमात्रया वासं कुर्वन्ति। एते शब्दाः यदा सम्यक् ज्ञायन्ते तदा व्यावहारिके जीवने किमपि अधिकं ज्ञातव्यं न अवशिष्यते। मनुष्यः अत्र एव समृद्धं जीवनम् अन्वेष्टुं शक्नोति।

असञ्ज्ञः मनुष्यः कीदृशः भवति ? शयनं तस्य शीलम्। सः जाग्रत् अपि सदा सुप्तः इव वर्तते। धृतराष्ट्रः सदा शयनम् एव कृतवान् इति न, तथापि जीवने सः 'जागरितः' इत्यपि वक्तुं न शक्यते। एतादृशः मनुष्यः ज्ञातुं शक्नोति, किन्तु ज्ञाने तस्य रुचिः नास्ति। श्रोतुं शक्नोति, किन्तु कर्णौ उद्घाटयितुं न इच्छति। असत्यम् अवगच्छति, किन्तु तत् स्वीकर्तुं तस्य मतिः नास्ति। अन्तःकरणस्य तरङ्गान् सः बलात् तिरस्करोति। उत्कोचजीविनः भ्रष्टाः अधिकारिणः असञ्ज्ञाः भवन्ति। तेषां हृदये न करुणा भवति, न च प्रायश्चित्तम्।

विसञ्ज्ञस्य सम्बन्धः अज्ञानेन उन्मादेन च सह वर्तते। एतस्याम् अवस्थायां मनुष्यः, न इच्छन् अपि दोषं करोति। राजा अशोकः विसञ्ज्ञः आसीत्। सः कलिङ्गेषु विजयं प्राप्य अवगतवान् यत् विजयस्य उन्मादात् महती हिंसा प्रवृत्ता। तदनन्तरं कश्चित् अभिनवः प्रबुद्धः अशोकः प्रादुर्भुतः। सः बुद्धं शरणं गतः। यः मनुष्यः दोषात् किमपि शिक्षते सः विसञ्ज्ञः। कुम्भकर्णः अपि सत्यम् अवगन्तुं शक्नोति, किन्तु रावणः न शक्नोति।

ससञ्ज्ञः मनुष्यः स्वीयं जीवनं सततम् अलङ्करोति। सः पूर्णतः जागरितः भवति। तादृशः मनुष्यः चौर्यं, हिंसां, मृषावादं वा कर्तुं स्वभावतः एव न इच्छति। विदुरः ससञ्ज्ञः आसीत्। तेन सह विभीषणस्य गणनां कर्तुं शक्नुमः। जागरितः विदुरः सुप्तं धृतराष्ट्रम् अनेकधा बोधयितुं यत्नं कृतवान्। विभीषणः अपि तदेव कर्तव्यकर्म कृतवान्।

अस्माकं पुरतः रावणः, कुम्भकर्णः, विभीषणः च उपस्थिताः सन्ति। यस्य वरणं करिष्यामः तस्य प्रतिबिम्बम् अस्माकं जीवने पतिष्यति।

## न्यायनिर्णयः

✍ श्रीनिधिः

शान्तिपुरनामके ग्रामे रामः भीमः चेति उभौ सुहृदौ आस्ताम्। रामस्य क्षेत्रस्य पार्श्वे एव भीमस्य क्षेत्रम्। रामः यद्यपि निर्धनः, तथापि ग्रामे उत्तमां कीर्तिं सम्पादितवान् आसीत्। भीमः तु धनिकः। किन्तु असूयापरः कृपणः च। कोऽपि यदि प्रगतिं साधयति तर्हि ईर्ष्यां प्राप्नोति स्म सः।

अथ कदाचित् क्षेत्रकर्षणावसरे रामः अचिन्तयत् – 'मया एतत् कष्टम् इतोऽपि कियन्तं कालं सोढव्यम् इति न ज्ञायते। भगवता मयि यदि कृपा दर्श्येत तर्हि अहं सुखेन जीवनं कुर्याम्' इति। अत्रान्तरे एव हलस्य अग्रभागः केनचित् शिलाखण्डेन घट्टितः जातः। रामः खनित्रेण तं शिलाखण्डम् अपनीतवान्। तस्य अधः तेन काचित् पेटिका प्राप्ता। पेटिकायाम् आभरणानि आसन्। तानि दृष्ट्वा रामः भगवन्तं कृतज्ञतापूर्वकं स्मृतवान्।

तस्मिन् एव समये भीमः तत्र आगतः। सः अपि आभरणैः पूर्णां पेटिकाम् अपश्यत्। 'एतानि आभरणानि मया वशीकरणीयानि एव' इति विचिन्त्य सः रामम् अवदत् – ''राम! एतानि पश्यामि तावत्'' इति।

ततः सः रामेण दत्तानि आभरणानि एकैकशः दृष्ट्वा – ''भोः, एतानि मम मातुः। बहोः कालात् पूर्वम् एतानि अदृश्यतां गतानि आसन्। अन्वेषणात् अपि नैव लब्धानि। अद्य सौभाग्येन एतानि प्राप्तानि'' इति वदन् तानि स्वीकृत्य प्रस्थितवान्।

तदा रामः भीमस्य हस्तात् तानि बलात् स्वीकृत्य अवदत् – ''न एतानि भवतः मातुः। भवान् असत्यवादी। एतानि मया कृषिभूमौ प्राप्तानि। भगवता दत्तानि एतानि'' इति।

एतत् श्रुत्वा क्रोधं प्रकटयन् भीमः – ''एतानि मम मातुः इत्यत्र सन्देहः एव नास्ति। गच्छाव ग्रामाधिकारिणः समीपम्। एतानि कस्य इति सः एव निर्णयतु'' इति अवदत्।

ततः तौ ग्रामाधिकारिसमीपं गतवन्तौ। उभयोः अपि कथनं श्रुत्वा अपि ग्रामाधिकारी निर्णेतुं न शक्तवान् यत् आभरणानि कस्य इति। सः सम्यक् जानाति स्म यत् भीमः स्वार्थी, रामः च निष्कपटः इति।

अतः सः किञ्चित् विचिन्त्य अवदत् –''भवन्तौ श्वः आगच्छताम्। तदा अहं निर्णयं श्रावयिष्यामि'' इति।

अनन्तरदिने तौ ग्रामाधिकारिसमीपम् आगतौ। ग्रामाधिकारिणः निर्णयं श्रोतुं बहवः उपस्थिताः आसन्। ग्रामाधिकारी पेटिकाम् उद्घाट्य – ''भवन्तौ उभौ अपि वदतः यत् एतानि मदीयानि इति। ..'' इति यावत् वदन् आसीत् तावता उभौ राजभटौ तत्र आगत्य ग्रामाधिकारिणम् उपसर्प्य उक्तवन्तौ – ''महाराजः मृगयार्थं समीपस्थम् अरण्यम् आगतः अस्ति। तत्र भवता उपस्थातव्यम्'' इति।

तावता ताभ्याम् आभरणपेटिका दृष्टा। तौ आश्चर्येण तानि आभरणानि स्पृष्ट्वा परीक्ष्य – ''एतानि तु महाराज्ञ्याः आभरणानि। केभ्यश्चित् दिनेभ्यः पूर्वम् एतेषां चौर्यं प्रवृत्तम् आसीत्। एतानि कुतः प्राप्तानि ?'' इति

अपृच्छताम्।

ग्रामाधिकारी प्रवृत्तं सर्वम् अवदत्। तदा तौ भटौ उक्तवन्तौ – "एतस्य तात्पर्यं यत् एतौ उभौ अपि सम्भूय चौर्यं कृतवन्तौ इति। महाराजसमीपम् एतौ नयाम तावत्" इति।

एतत् श्रुत्वा नितरां भीतः भीमः ग्रामाधिकारिणः पादौ गृहीत्वा – "महाशय! एतेषाम् आभरणानां, मम च न कोऽपि सम्बन्धः। रामेण एतानि क्षेत्रे प्राप्तानि इत्येतदेव सत्यम्। अविवेकेन मया एतेषां प्राप्त्यर्थं यत्नः कृतः। कृपया अहं क्षन्तव्यः" इति प्रार्थितवान्।

"भीम! भवतः मुखात् वस्तुस्थितिं वाचयितुम् एव मया एतत् तन्त्रम् आश्रितम्। एतौ न राजभटौ, अपि तु मदीयौ एव जनौ। आभरणानां सम्बन्धः मम नास्ति इति भवता सर्वेषां पुरतः अङ्गीकृतम्। अतः एतानि रामस्य एव इति निर्णीतं जातम्। भवता असत्यम् उक्तम् इत्यतः शतं रजतनाणकानि दण्डरूपेण दातव्यानि" इति अवदत् ग्रामाधिकारी। जनाः तस्य निर्णयं बहुधा श्लाघितवन्तः।

## यदि सा अभविष्यत् तर्हि...

श्रीरङ्गः तरङ्गः च उत्तमौ सुहृदौ। किन्तु तयोः व्यर्थभ्रमणरूपः कश्चन दुरभ्यासः आसीत्। विना विशेषोद्देशं तौ इतस्ततः भ्रमतः स्म। कदाचित् तौ व्रणितं जनं कञ्चित् वैद्यस्य निकटम् आनीतवन्तौ। वैद्यः तस्य व्रणान् स्वच्छीकृत्य पट्टिकया बद्ध्वा नाडीपरीक्षाम् अकरोत्। ततः स्वल्पसमयानन्तरं वैद्येन पृष्टम् –"अस्य व्रणाः कथं सञ्जाताः ?" इति।

"द्वौ मेषौ परस्परं युद्ध्यमानौ आस्ताम्। मया उच्चस्वरेण उक्तं यत् कृष्णमेषः एव जयं प्राप्स्यति इति। किन्तु अस्य वादः आसीत् – श्वेतमेषः एव जेष्यति इति। एवं मम श्रीरङ्गस्य च कोलाहलः अधिकः जायमानः कलहरूपं प्राप्नोत्। आवां परस्परं ताडयन्तौ योद्धुम् उद्युक्तौ। तस्मिन् प्रसङ्गे एषः सज्जनः तेन मार्गेण गच्छन् आसीत्। कलहं कुर्वन्तौ आवां पृथक्कृत्य एषः आवयोः मध्ये स्थितवान्। मया श्रीरङ्गस्य ताडनोद्देशेन शिला क्षिप्ता। किन्तु सा शिला मध्ये आगतस्य अस्य उपरि पतिता, अयं च व्रणितः अभवत्" इति उक्तं तरङ्गेण।

श्रीरङ्गः कौतुकपूर्णेन स्वरेण अवदत् – "एतस्य मस्तिष्के व्रणः न जातः स्यात् खलु ? एतत् तु महत् भाग्यम् एव" इति।

"तथा व्याकुलता मास्तु भवतोः। अस्य वराकस्य तत् मस्तिष्कं यदि स्यात् तर्हि एषः भवतोः मध्ये किमर्थम् आगमिष्यत् ? व्रणः तु सामान्यः एव। स्रवत् रक्तं दृष्टवतः अस्य विसञ्ज्ञता अभवत्। स्वल्पे एव समये सामान्यस्थितिं प्राप्स्यति एषः" इति वैद्यः हसन् उक्तवान्।

## प्रतिमानाटकम् ( ग्रन्थपरिचयः )

व्योम शाहः

**अनुवर्तते**

महाकविभासप्रणीते प्रतिमानाटके एतावताऽस्माभिः दृष्टं यत् – चेट्याः हस्ताद् वल्कलानि गृहीत्वा सीता धरति । रामेण स्वकीयं वनं प्रति गमनस्य वार्त्ता सीतायै निवेदिता । सीता च लक्ष्मणश्च तमनुसरतः । द्वितीयेऽङ्के रामलक्ष्मणवैदेहीनां वनगमनेन दशरथस्य चित्तशून्यता वर्णिता । दशरथः कैकेय्याः कृत्यं गर्हते । पितॄणां स्मरणपूर्वकं दशरथः प्राणैः विमुक्तः ।

तृतीयाङ्कस्य प्रवेशके भट-सुधाकरयोः परस्परेण संवादेन ज्ञाप्यते कौसल्यादयः स्वर्गगतस्य दशरथस्य प्रतिमागेहं द्रष्टुम् आगन्तारः । अङ्कस्य प्रारम्भे भरतः सूतेन सह रथेन प्रविशति । तयोः संवादस्य श्लोकः अन्तरालापरूपः ।

**''पितुर्मे को व्याधिः ?'' ''हृदयपरितापः खलु महान् ।''**
**''किम् आहुस्तं वैद्याः ?'' ''न खलु भिषजस्तत्र निपुणाः ।''**
**''किम् आहारं भुङ्क्ते ?'' ''शयनमपि भूमौ निरशनः ।''**
**''किम् आशा स्याद् ?'' ''दैवम्'' ''स्फुरति हृदयं वाह्य रथम् ॥३/१॥''**

न हि केनाऽपि राज्ञः अवसानविषये भरतः विज्ञापितः । सूतः अपि मनसि तादृशस्य कर्मणः कथने सर्वेषां सामर्थ्याभावं चिन्तयति ।

**''पितुः प्राणपरित्यागं मातुरैश्वर्यलुब्धताम् ।**
**ज्येष्ठभ्रातुः प्रवासं च त्रीन् दोषान् कोऽभिधास्यते ? ॥३/४॥''**

भटः प्रविश्य निवेदयति यद् गुरुभिः सः आदिष्टः यद् किञ्चित् कलानन्तरं रोहिण्यां प्रवेष्टव्यम् इति । भरतः विश्रमितुम् एकत्र स्थाने रथं स्थापयति । सः अदूरस्थे दैवतस्थाने ध्वजं वा चिह्नं वा प्रहरणं वा अपश्यन् जिज्ञासापूर्वकं तत्र प्रविशति । तत्रत्यानां सज्जानां प्रतिमानां च आकृतीः दृष्ट्वा सः महान्तं हर्षं मनसि अनुभूतवान् । तदैव तत्र देवकुलिकः प्रविशति । परिचयानन्तरं भरतः तत्रस्थानां प्रतिमानां विवरणं कर्तुं निवेदयति । देवकुलिकः क्रमशः दिलीप-रघु-अजानां प्रतिमाम् अदर्शयत् । पितुः दशरथस्य प्रतिमाम् अवलोक्य सः अपृच्छत् – ''धरमाणानाम् (जीवताम्) अपि प्रतिमाः स्थाप्यन्ते ?'' देवकुलिकः प्रतिवदति – ''न खलु, अतिक्रान्तानाम् (मृत्युम् आप्तवताम्) एव ।''

इतोऽपि भरतस्य मनसि संशयः न शान्तः इति विज्ञाय सः पुनः अभिदधाति –

**''येन प्राणाश्च राज्यं च स्त्रीशुल्कार्थे विसर्जिताः ।**
**इमां दशरथस्य त्वं प्रतिमां किं न पृच्छसि ? ॥३/८॥''**

एतत् कुलिशोपमं वचनं श्रुत्वा भरतः मूर्च्छितः । किञ्चित् समाश्वासम् आप्त्वा सः देवकुलिकम् अन्यतरं वृत्तान्तं पृच्छति । देवकुलिकमुखात् रामस्य वनं प्रति गमनं श्रुत्वा सः द्विगुणं मोहम् उपगतः । उत्थाय सखेदं कथयति –

**''अयोध्यामटवीभूतां पित्रा भ्रात्रा च वर्जिताम् ।**
**पिपासार्तोऽनुधावामि क्षीणतोयां नदीमिव ॥३/१०॥''**

विस्तरेण वृत्तान्तं ज्ञातुमिच्छन् सः पुनः देवकुलिकं निवेदयति । किञ्चिद् इव उक्ते सति भरतः सम्पूर्णमपि वृत्तान्तं जानाति पुनश्च मूर्च्छितः भवति ।

तदैव प्रवेशकसूचनानुगुणं कौसल्यादयः प्रविशन्ति । देवकुलिकः वदति

**''काले खल्वागता देव्यः पुत्रे मोहमुपागते ।**
**हस्तस्पर्शो हि मातॄणाम् अजलः सजलाञ्जलिः ॥३/१२॥''**

( क्रमशः... )

## मासवार्त्ता:

**सम्पन्नः ‘संस्कृतयात्रा’ नृत्यनाटिकायाः मञ्चनकार्यक्रमः ।**













एकलव्य–संस्कृत–एकेडेमी, संस्कृतविद्याप्रतिष्ठानम्, भारतीय–विद्या–भवनम्, इन्फोसिस फाउण्डेशन च इत्येतेषां संयुक्तोपक्रमेण मार्चमासस्य १७ दिनाङ्के भवन्समहाविद्यालयस्य सभागारे सम्पन्नः भव्यः ‘संस्कृतयात्रा’ नृत्यनाटिकायाः मञ्चनकार्यक्रमः । कार्यक्रमेऽस्मिन् संस्कृतसाहित्यं भारतीयज्ञानपरम्परा इत्येतौ विषयौ अधिकृत्य ६५ कलाकाराः विविधाः कृतीः प्रदर्शितवन्तः । कलागुरुः माधवी झाला, कलागुरुः झङ्खना शाहः, श्रीमती भक्तिः ओझा च कलाकाराणां मार्गदर्शनम् अकुर्वन् । अत्रोल्लेखनीयं यत् अस्मै कार्यक्रमाय भारतीय–विद्या–भवनस्य सांस्कृतिक–विभागेन निमन्त्रणं दत्तम् आसीत् । निखिलस्य कार्यक्रमस्य परिकल्पना डॉ. मिहिर–उपाध्यायस्य आसीत् । कार्यक्रमेऽस्मिन् संस्कृतविद्याप्रतिष्ठानस्य न्यासी श्रीमती भावना रावलः संस्कृत–साहित्य–अकादाम्याः अध्यक्षः डॉ. भाग्येशः जहा, भारतीय–विद्या–भवनस्य अध्यक्षः श्री मूकेशः पटेलः च विशेषोपस्थितिं प्रायच्छन् ।

**सम्पन्नः छन्दःपरिचयवर्गः**

मार्चमासस्य १२ दिनाङ्कतः एप्रिलमासस्य ४ दिनाङ्कपर्यन्तम् एकलव्य–संस्कृत–एकेडेमीसंस्थाने छन्दःपरिचयवर्गः प्राचलत् । अभ्यासक्रमेऽस्मिन् संस्कृतच्छन्दसाम् अध्यापनम् अभवत् । श्रीश्यामः पटेलः छात्रेभ्यः मार्गदर्शनं प्रायच्छत् । अभ्यासक्रमेऽस्मिन् १४ छात्राः भागम् अवहन् ।

## कृपया हसन्तु

**शिक्षकः - (छात्रान् उद्दिश्य) आरक्षकस्य शिक्षकस्य च मध्ये कः भेदः?**

**रमणः - शिक्षकः पादाघातेन वर्गात् बहिः क्षिपति । आरक्षकः पादाघातेन कारागारस्य अन्तः क्षिपति इत्येव भेदः ।**

★ ★ ★ ★ ★

**रमणः मन्दिरं गत्वा ईश्वरं प्रति "हे भगवन्, मह्यं शीघ्रं सर्वकारीयां वृत्तिं दापयतु ।"**

**ईश्वरः - ( हसित्वा) भोः नमन ! त्वं मम कृते कदलिफलानि, सेवफलानि, नारङ्गफलानि च किमपि न आनीतवान् ? रिक्तहस्ताभ्याम् एव आगतवान् ?**

**रमणः - भोः प्रभो ! कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**

★ ★ ★ ★ ★

**पक्षिणः पादौ दर्शयित्वा शिक्षकः छात्रम् अपृच्छत्- "भोः, एतस्य पक्षिणः नाम वद ।"**

**छात्र : - अहं न जानामि ।**

**शिक्षकः - (कोपेन) त्वं परीक्षायाम् अनुत्तीर्णः । तव नाम किम् ?**

**छात्रः - मम पादौ दृष्ट्वा लिखतु ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**भीमं वनं भवति तस्य पुरं प्रधानं सर्वो जनः सुजनतामुपयाति तस्य ।**
**कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥**

**तात्पर्यम्** – यः मनुष्यः पूर्वस्मिन् जन्मनि अनेकानि सुकृतानि (पुण्यकर्माणि) कृतवान् सः अस्मिन् जन्मनि सर्वत्र सुखम् एव प्राप्नोति । नास्ति अत्र संशयः । तादृशः पुण्यवान् घोरं वनं प्रविशति चेदपि तद्वनं पत्तनमिव सर्वसौलभ्यदायकं भवति। अपि च ये ये तं पश्यन्ति ते सर्वे अपि तस्य विषये मृदु व्यवहरन्ति। किं बहुना, समग्रा भूमिः एव तस्य विषये सम्पद्युक्ता च भवति।

**मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तुयते स्वयं हतैः ।**
**लघयन्खलु तेजसा जगन्न महानिच्छाति भूतिमन्यतः ॥**

**तात्पर्यम्** – सिंहः स्वशक्त्या हतानां गजानां मृतदेहानां मध्ये गौरवं प्रदर्शयितुम् इच्छति। तथैव वीरः अपि स्वतेजसा समग्रं विश्वं जेतुम् इच्छति।

**मनसि वचसि काये पुण्यपीयूषपूर्णाः त्रिभूवनमुपकारश्रेणिभिः प्रीणयन्तः ।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥**

**तात्पर्यम्** – सत्पुरुषाणां वचांसि मनांसि शरीराणि च अमृतेन पूर्णानि भवन्ति। तादृशेन अमृतपूर्णेन वचनेन, चेतसा, शरीरेण च ते सज्जनाः उपकारसहस्रेण लोके स्थितानां सर्वेषां जीविनामपि हितम् आचरन्ति। अपि च अन्येषु स्थिताः गुणाः अल्पाः चेदपि तान् एव बहु मत्वा, मनसि सन्तोषम् अनुभवन्ति। किन्तु एतादृशाः जनाः जगति कियन्तः सन्ति ?

## ज्ञानसरित्

श्यामः पटेलः

**डीयमानं छत्रं – ''पेरेशूट''** – डीयमानात् विमानात् हेलिकोप्टरयानात् वा कदाचित् आवश्यकतानुगुणम् अधः कूर्दितुं ''पेरेशूट'' नाम उपकरणम् अपेक्षितं भवति। एतत् डीयमानं छत्रं वस्त्रनिर्मितं वा प्लास्टिकनिर्मितं वा भवति। तस्य अधः मानवः आत्मानं लम्बयितुं शक्नुयात् तदर्थं लम्बिताः रज्जवः भवन्ति। अधःपतनसमये छत्रेऽस्मिन् वायुभरणं भवति। तेन अवरोधः भवति। तदवरोधत्वात् शनैः शनैः भूमौ पतनं भवति। एतत् तु वयं जानीमः। किञ्चित् अधिकं जानीयाम।

अस्य ''पैरेशूट'' नाम छत्रस्य इतिहासः रोचकः अस्ति। एतस्य छत्रस्य गवेषणा ख्रिस्ताब्दस्य १७८३तमे वर्षे सेबास्टियन–लेनोर्मण्ड–द्वारा अभवत्। तदा विमानानि न आसन्। अतः एतत् छत्रं स्वीकृत्य पर्वतात् वा उन्नतभवनात् वा जनाः कूर्दन्ते स्म। होट–एयर–बलून– माध्यमेनापि एतेन डयमानच्छत्रेण सह जनाः कूर्दनस्य प्रयोगान् कृतवन्तः। ख्रिस्ताब्दस्य १७८५तमे वर्षे होट–एयर–बलून इत्यस्मात् एकस्य कुक्कुरस्य कूर्दनं कारयित्वा ''पेरेशूट'' इत्यस्य उपयोगस्य प्रारम्भः अभवत्। एकः अभियन्ता आसीत् – ब्लान्यार्ड। तेन क्षौमवस्त्रात् छत्रनिर्माणं कृतमासीत्। ख्रिस्ताब्दस्य १७९७तमे वर्षे एन्ड्र्यु–गानेटी नामकः साहसिकः ३० फीटपरिमितस्य व्यासस्य छत्रं निर्माय ८००० फीटमितस्य औन्नत्यात् कूर्दितवान्। तदनन्तरं तु नैके विश्वविक्रमाः अभवन्। अद्यत्वे ''पेरेशूट'' इत्यस्य निर्माणे विभिन्नवस्त्राणाम् उपयोगेन, तस्य आकृतौ परिवर्तनं कृत्वा च आधुनिकानां छत्राणां निर्माणं जायमानमस्ति।

गवेषणा – invention, डीयमान/डयमान – flying, क्षौमवस्त्रम् – silk fabric

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सन्ततिः** | अपत्य | lineage |
| **वेधाः** | ब्रह्मा | brahma |
| **शावकः** | किसी भी प्राणी का अपत्य | young of any animal |
| **मेखला** | कटिबन्ध | waistband |
| **वैश्वानरः** | अग्नि | fire |
| **प्रस्वेदः** | अत्यंत स्वेद | excessive perspiration |
| **निदाघः** | ग्रीष्म | summer |
| **ललाटंतपः** | ललाट को तपानेवाला | scorching the forehead |
| **चूडा** | शिखा | hair on top of head |
| **चिरन्तनम्** | पुरातन | ancient |
| **अंशुकरः** | सूर्य | sun |
| **शीतांशुः** | चन्द्र | moon |
| **शुनासीः** | इन्द्र | Indra |
| **धवलः** | श्वेत | white |
| **धृष्टः** | साहसी | bold |

## किं भवन्तः जानन्ति ?

**१ ) द्वैताद्वैतपरम्परायाः प्रवर्तकः कः आसीत् ?**
(क) निम्बार्काचार्यः (ख) वल्लभाचार्यः (ग) रामानुजाचार्यः (घ) शङ्कराचार्यः

**२ ) वल्लभाचार्यः कस्य मतस्य प्रवर्तकः आसीत् ?**
(क) शुद्धाद्वैत (ख) अद्वैत (ग) द्वैत (घ) विशिष्टाद्वैत

**३ ) शङ्करदेवमाधवदेवयोः सम्बन्धः केन राज्येन सह आसीत् ?**
(क) बङ्गालेन (ख) असमेन (ग) उडीसया (घ) सिक्किमेन

**४ ) एतेषु कस्य सम्बन्धः गुजरातेन सह आसीत् ?**
(क) तुकारामस्य (ख) नरसिंहमहेतामहाभागस्य (ग) मीरायाः (घ) रामदासस्य

**५ ) आचार्यपुरन्दरदासस्य सम्बन्धः केन राज्येन सह आसीत् ?**
(क) कर्णाटकेन (ख) गुजरातेन (ग) तमिलनाडुना (४) हरियाणाराज्येन

**६ ) चैतन्यमहाप्रभोः सम्बन्धः केन राज्येन सह आसीत् ?**
(क) पश्चिमबङ्गालेन (ख) गुजरातेन (ग) उत्तरप्रदेशेन (घ) उडीसया

**७ ) ब्रह्मणः रोम्नः ये उत्पन्नाः ते के ?**
(क) सजपाः (ख) वायुभक्षाः (ग) वालखिल्याः (घ) पञ्चाग्निसपिन

उत्तराणि – (१) क (२) क (३) ख (४) ख (५) क (६) क (७) ग

# अस्माकम् आगामिकार्यक्रमाः




EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 12/04/24 to 12/07/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

### Second Level

**Date :** 08/04/24 to 08/07/24
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

## सन्धिः

**Date :** 03/06/24 to 26/06/24
**Day :** Wednesday-Friday
**Time :** 6:30pm to 08:00pm
**Fees :** 3000/-

**contact: Dr. Mihir Upadhyay, 98246 16237**

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006